"प्रदक्षिणेन समर्थेन।" इति तट्टीकायां रामानुजः ।)

प्रदक्षिणा, स्त्री, (प्रगता दक्षिणमिति । "तिष्ठद्गुप्रभृतीनि च । २ । १ । १७।" इति समासः ।) प्रदक्षिणम् । यथा,—

अथ प्रदक्षिणा ।

"ततः प्रदक्षिणां कुर्य्याद्भक्त्या भगवतो हरेः ।
नामानि कीर्त्तयन् प्रह्वो तास्य साष्टाङ्गवन्दनाम् ॥"

प्रदक्षिणासङ्ख्या चोक्ता नारसिंहे ।

"एकां चण्ड्या रवेः सप्त तिस्रो दद्याद्विनायके ।
चतस्रः केशवे दद्यात् शिवे त्वर्द्धप्रदक्षिणाम् ॥"

प्रदक्षिणामाहात्म्यं वाराहे ।

"प्रदक्षिणां ये कुर्व्वन्ति भक्तियुक्तेन चेतसा ।
न ते यमपुरं यान्ति यान्ति पुण्यकृतां गतिम् ॥
यश्चिः प्रदक्षिणं कुर्य्यात् साष्टाङ्गकप्रणामकम् ।
दशाश्वमेधस्य फलं प्राप्नुयान्नात्र संशयः ॥"

स्कान्दे ब्रह्मनारदसंवादे ।

"विष्णोर्विमानं यः कुर्य्यात् सकृद्भक्त्या प्रदक्षिणम् ।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥"

तत्रैव चातुर्म्मास्यमाहात्म्ये ।

"चतुर्व्वारं भ्रमीभिस्तु जगत् सर्व्वं चराचरम् ।
क्रान्तं भवति विप्राग्र्य ! तत्तीर्थगमनाधिकम् ॥"

तत्रैवान्यत्र ।

"प्रदक्षिणं तु यः कुर्य्याद्धरिं भक्त्या समन्वितः ।
हंसयुक्तविमानेन विष्णुलोकं स गच्छति ॥"

नारसिंहे ।

"प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे ।
कृतेन यत् फलं नृणां तच्छृणुष्व नृपात्मज ! ।
पृथ्वीप्रदक्षिणफलं यत्तत् प्राप्य हरिं व्रजेत् ॥"

अन्यत्र च ।

"एवं कृत्वा तु तस्यास्य यः कुर्य्याद्विप्रदक्षिणम् ।
सप्रदीपवतीपुण्यं लभते तु पदे पदे ॥
पठन्नामसहस्रन्तु नामान्येवाथ केवलम् ॥"

भक्तिसुधोदये ।

"विष्णुं प्रदक्षिणीकुर्व्वन् यस्तत्रावर्त्तते पुनः ।
तदेवावर्त्तनं तस्य पुनर्नावर्त्तते भवे ॥"

हृन्नारदीये यमभगीरथसंवादे ।

"प्रदक्षिणत्रयं कुर्य्यात् यो विष्णोर्मनुजेश्वर ! ।
सर्व्वपापविनिर्म्मुक्तो देवेन्द्रत्वं समश्नुते ॥"

तत्रैव प्रदक्षिणमाहात्म्ये सुधर्म्मोपाख्यानारम्भे ।

"भक्त्या कुर्व्वन्ति ये विष्णोः प्रदक्षिणचतुष्टयम् ।
तेऽपि यान्ति परं स्थानं सर्व्वलोकोत्तमोत्तमम् ॥
तत् ख्यातं यत् सुधर्म्मेण पूर्व्वस्मिन् ग्रध्रजन्मनि ।
छायाप्रदक्षिणाभावान्महाविहिरभूदिति ॥"

अथ प्रदक्षिणायां निषिद्धं विष्णुस्मृतौ ।

"एकहस्तप्रणामश्च एका चैव प्रदक्षिणा ।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"

अकाले भोजनादिसमये । किञ्च ।

"तस्यास्य पुरतो नैव कुर्य्यात्सैव प्रदक्षिणाम् ।
कुर्य्याद्भ्रमरिकारूपं वैष्णवापादनीं प्रभौ ॥"

तथा चोक्तम् ।

"प्रदक्षिणं न कर्त्तव्यं विमुखत्वाच्च कारणम् ॥"

इति श्रीहरिभक्तिविलासे ८ विलासः ॥

प्रदत्तं, त्रि, ( प्र+दा+क्तः । ) प्रकर्षेण दत्तम् । इति मुग्धबोधव्याकरणम् ॥

प्रदरः, पुं, ( प्र+दॄ विदारणे+"ऋदोरप् ।" ३ । ३ । ५७ । इति भावादौ यथायथं अप् । ) भङ्गः । वाणः । इत्यमरः ॥ विदारः । नारीरुग्भेदः । इति मेदिनी ॥ * ॥ अस्य नामान्तरं असृग्दरम् । तत्तु पतितयोन्या रक्तादिधातुक्षरणम् । अस्य निदानम् । यथा,—

"विरुद्धमद्याध्यशनादजीर्णाद्
गर्भप्रपातादतिमैथुनाच्च ।
यानाध्वशोकादतिकर्षणाच्च
भाराभिघाताच्छयनाद्दिवा च ॥
असृग्दरं भवेत् सर्व्वं साङ्गमर्द्दं सवेदनम् ।
तस्यातिवृद्धौ दौर्व्बल्यं भ्रमो मूर्च्छा मदस्तृषा ।
दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः ॥"

स च चतुर्व्विधो यथा,—

"तं श्लेष्मपित्तानिलसन्निपातै-
श्चतुःप्रकारं प्रदरं वदन्ति ॥"

श्लैष्मिकस्य तस्य लक्षणम् ।

"आमं सपिच्छाप्रतिमं सपाण्डु-
पुलाकतोयप्रतिमं कफात्तु ॥"

पैत्तिकस्य तस्य लक्षणम् ।

"सपीतनीलासितरक्तमुष्णं
पित्तार्त्तियुक्तं भृशवेगि पित्तात् ॥"

वातिकस्य तस्य लक्षणम् ।

"रूक्षारुणं फेनिलमल्पमल्पं
वातार्त्तिवातात् पिशितोदकाभम् ॥"

तस्य त्रैदोषिकस्य लक्षणम् ।

"सक्षौद्रसर्पिर्हरितालवर्णं
मज्जप्रकाशं कुणपं त्रिदोषात् ।
तच्चाप्यसाध्यं प्रवदन्ति तज्ज्ञा
न तत्र कुर्व्वीत भिषक् चिकित्साम् ॥"

इति माधवकरः ॥ * ॥

अस्यौषधं यथा,—

"घृततुल्या रुदन्त्याया पीता क्षीरेण वै सहा ।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥"

इति गारुडे १८६ अध्यायः ॥ * ॥

अपि च ।

"दध्ना सौवर्च्चलाजाजीमधूकं नीलमुत्पलम् ।
पिबेत् क्षौद्रयुतं नारी वातासृग्दरशान्तये ॥
एषां प्रत्येकं माषद्वयम् । सर्व्वमेकीकृत्य दध्ना कर्षचतुष्टयेन पिष्ट्वा तत्र माषाष्टकं मधु निःक्षिप्य पेयम् ॥ * ॥

"मधुकं कर्षमेकन्तु चतुष्कर्षा सिताप्यथा ।
तण्डुलोदकसंपिष्टं लोहिते प्रदरे पिबेत् ॥
बला कङ्कतिकाख्या या तस्या मूलन्तु चूर्णितम् ।
लोहिते प्रदरे खादेच्छर्करामधुसंयुतम् ॥ * ॥
शुचिस्थाने श्राम्रनखा मूलमुत्तरदिग्भवम् ।
नीतमुत्तरफल्गुन्यां कटिबद्धं हरेद्रुक् ॥ * ॥

रसाञ्जनं तण्डुलकस्य मूलं
क्षौद्रान्वितं तण्डुलतोयपीतम् ।
असृग्दरं सर्व्वभवं निहन्ति
यासश्च भार्गी सह नागरेण ॥ * ॥
अशोकवल्कलक्वाथशृतं दुग्धं सुशीतलम् ।
यथाबलं पिबेत् प्रातस्तीव्रासृग्दरनाशनम् ॥"

अशोकवल्कलपलं द्वात्रिंशत्पलसंमितेन जलेन निष्क्वाथ्य शेषेण पलाष्टकमायेन सह क्षीरं पलाष्टकमितं विपचेत् तत्तु दुग्धावशेषं कर्त्तव्यं तन्मध्ये पलचतुष्टयमितं दुग्धं पेयं वह्निबलापेक्षया वा ॥ * ॥

"कुशमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना ।
एतत् पीत्वा त्र्यहं नारी प्रदरात् परिमुच्यते ॥"

इति भावप्रकाशः ॥

( तथास्य चिकित्सान्तरं यथा,—

"काकजङ्घामूलं वा मूलं कार्पासमेव वा ।
पाण्डुप्रदरशान्त्यर्थं पिबेत्तण्डुलवारिणा ॥"

"कुशमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना ।
एतत् पीत्वा त्र्यहान्नारी प्रदरात् परिमुच्यते ॥"

"प्रदरं हन्ति बलायामूलं दुग्धेन मधुयुतं पीतम् ॥"

"गुडेन बदरीचूर्णं मोचमामं तथा पयः ।
पीता लाक्षा च सघृता पृथक्प्रदरनाशना ॥"

इति चक्रपाणिसंग्रहेऽसृग्दराधिकारे ॥ )

प्रदर्शितः, त्रि, (प्र+दृश्+णिच्+क्तः ।) आलोकितः । यथा,—

"क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ॥"

इति मुग्धबोधटीकायां दुर्गादासः ॥

प्रदलः, पुं, ( प्रकर्षेण दलति दारयतीत्यर्थः । प्र+दल्+अच् । ) वाणः । इति जटाधरः ॥

प्रदानं, क्ली, ( प्र+दा+भावे ल्युट् । ) दानम् । इति शब्दरत्नावली ॥ प्रकृष्टदानञ्च । ( यथा, मनौ । ३ । २४० ।

"होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते ॥")

प्रदिक्, [श्] स्त्री, (प्रगता दिग्भ्यः ।) विदिक् । इति जटाधरः ॥ (यथा, महाभारते ।१।१७४।३६।

"ततो विभ्रान्तमनसो जनाः क्षुद्भयपीडिताः ।
गृहाणि संपरित्यज्य वभ्रमुः प्रदिशो दिशः ॥"

प्रकृष्टा दिक् । ( यथा, हरिवंशे । १६३ । ८ ।

"प्रदिशो विदिशश्चैव शरधारासमावृताः ।
अन्धकारीकृतं व्योम दिनेशो नैव दृश्यते ।")

प्रदिग्धं, क्ली, ( प्र+दिह्+कर्म्मणि क्तः । ) मांसव्यञ्जनभेदः । यथा, शब्दचन्द्रिकायाम् ।

"मांसं बहुघृतैर्भृष्टं सिक्तं चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥
तदेव घृतकाष्ठं प्रदिग्धं सन्निजातकम् ॥"

त्रि, प्रलिप्तः ॥ (रूषितः । यथा, रामायणे । ५।५।२८।

"अव्यक्तरेखामिव चन्द्रलेखां
पांशुप्रदिग्धामिव हेमरेखाम् ॥")

प्रदीपः, पुं, (प्रकर्षेण दीपयति प्रकाशयति प्रदीप्यते इति वा । प्र+दीप्+णिच् वा+कः । )